Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 6 | ISSN : 2581- 6306

# आचार्यराधावल्लभत्रिपाठिप्रणीतानां संस्कृतरूपकाणां ज्योतिषशास्त्रदृष्टया ग्रहणकालांशविवेचनम्



डॉ. धर्मेन्द्रकुमारः सिंहदेवः
सहायकाचार्यः, साहित्यविभागः, राष्ट्रियसंस्कृतसंस्थानम्,
(मानितविश्वविद्यालयः), भोपालपरिसरः
भोपालम्, मध्यप्रदेशः ।



प्रियंका सिंहः
शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतसंस्थानम्,
(मानितविश्वविद्यालयः), भोपालपरिसरः
भोपालम्, मध्यप्रदेशः।

**शोधसारः –** ज्योतिषशास्त्रं कालविधानशास्त्रं वर्तते । प्रत्यक्षः, अप्रत्यक्षः समक्षं भूत–भविष्य ज्ञापकत्वं अस्ति । अन्येषु शास्त्रेषु अपि अस्य कालस्य निर्धारणपूर्वकं ग्रहणं क्रियते । ज्योतिषशास्त्रे सूर्यचन्द्र पृथ्वी छाद्य–छाद्यौ सम्भूतौ ग्रहणकालस्य सिद्धान्तपक्षे वर्णनं तथा च तस्य ग्रहणस्य प्रभावः मनुष्योपरि भवति। अस्य वर्णनं होराशास्त्रे विद्यते । परञ्च आचार्यराधावल्लभत्रिपाठिना उपर्युक्त रूपकखण्डेषु कालविधानपूर्वकम् आच्छादनं छाद्य–छादक सम्बन्धः स्थाप्यते। अतोऽत्र साहित्यशास्त्रदृष्ट्या ग्रहणे किं करणीयम् ? किं न करणीयम् ? लाभहानिः इत्यस्मिन् विषये भणितम् मनीषिभिः ।

**पारिभाषिकशब्दावली** – ज्योतिषम् , सूर्यग्रहणम् ,चन्द्रग्रहणम् , कालः, लाभः, हानिः, रुपकाणि ।

---

## प्रस्तावना -

**"यथा शिखा मयूराणां नागानां मणयो यथा ।**
**तद्वद्वेदाङ्गशास्त्राणां ज्योतिषां मूर्धनि स्थितम्"।**[1]

[1] वेदाङ्गज्योतिषम् सोमकरभाष्यम्।

ज्योतिषशास्त्रं भारतीयविद्यानां महत्वपूर्णम् अङ्गमस्ति । कालात् प्रसूतमिदं विश्वं काले एव परिवर्द्धितं परिचालितञ्च । ज्योतिषशास्त्रस्यानुसारं ब्रह्माण्डस्य उत्पत्तिः कालत एव प्रारभ्यते । कालं विहाय कोऽपि जीवः जगति स्थातुं न शक्नोति । अपि च कालस्य ज्ञानं ज्योतिषशास्त्रं विना न भवितुमर्हति । अतः ज्योतिषाचार्यभास्करेण ज्योतिशास्त्रस्य व्याख्यानावसरे उक्तं **"कालतन्त्रं जगुः"**[2]। पाणिनीयशिक्षायां यथोक्तं **"ज्योतिषामयनं चक्षुः" ।**[3] ज्योतिषशास्त्रं तु वेदस्य नेत्रस्थानीयमस्ति । यथैव नेत्राभावे शरीरस्य अपूर्णता व्यर्थता च भवति तथैव ज्योतिषशास्त्रं कालविज्ञापकं शास्त्रम्, अतः कालविधानशास्त्रं ज्योतिषम् इति नाम्ना प्रसिद्धम् । यथा अथर्ववेदे उक्तं वर्तते **"पूर्णः कुम्भोऽधिकालः अहिस्तत् पश्यामो बहुधा नो सन्तः । य इमा विश्वानि भुवनानि प्रत्यङ्गकालस्तमाहुः परमे व्योमन्" ।**[4]

मानवस्य बहुविधकार्यस्य सिद्धिर्जायते । मानवजीवने ज्योतिशास्त्रस्य आवश्यकता पदे पदे अनुभूयते । एवं च ग्रहग्रहणं, संक्रान्तिः, यज्ञव्रतोद्वाहवनादिक्रियाणां सिद्धिः निर्णयश्च ज्योतिषशास्त्रेणैव सम्भवति यथा **"ग्रहग्रहणं संक्रान्तिर्यज्ञाध्ययनकर्मणाम् । प्रयोजनं व्रतोद्वाहक्रियाणां कालनिर्णयः" ।**[5] ग्रहणस्य प्रभावःमनुष्योपरि भवति नास्ति संदेहः । उक्तञ्च विद्वद्भिः **"बहुलफलं जपदानहुताधिके स्मृतिपुराणविदः प्रवदन्ति हि । सदुपयोगिजने सचमत्कृतिग्रहणमिदि्ननयोः कथाम्यतः" ।**[6] अर्थात् ग्रहणकाले कृतं जपदानं, हुताधिकं महत्फलप्रदायकं भवतीति विश्रुतम् । ग्रहणशब्दस्य व्युत्पत्या ग्रहणशब्दः इत्यत्र गृ-ग्रहणे धातोः, ल्युट्-प्रत्यये सति ग्रहणमिति रुपं जायते । गृह्यतेऽनेनेति ग्रहणम्, व्युत्पत्या ग्राहकः यदा ग्राह्यं वस्तु गृहणाति तदा ग्रहणम् । यतो ग्रहणे ग्राह्यग्राहकयोगो भवति । ग्राह्यग्राहकयोर्योगोऽवश्यम्भावी । ज्योतिषशास्त्रीय-खगोलीयक्रिया-प्रतिक्रियासु व्याप्तकालस्य स्वीकृतिरेव ग्रहणमिति उच्यते ।

- **ग्रहणस्य परिभाषा** -

आचार्यकपिलेश्वरशास्त्रिणा प्रोक्तं यत् यदा ग्राह्यग्राहकयोः पूर्वान्तराभावो याम्योत्तरान्तराभावश्च भवति, तदैव ग्रहणम् । आचार्यभास्करेण प्रोक्तं **"सपातसूर्यस्य भुजांशका यदा मनूनकाः स्पादग्रहणस्य सम्भवः" ।**[7]

---

[2] वेदाङ्गज्योतिषम् सोमकरभाष्यम्।

[3] महर्षिः पाणिनिः, पाणिनिशिक्षायाम्।

[4] अथर्ववेदे काण्डः पञ्चमः ।

[5] ज्योतिषबोधे पं. कमलाकान्तठाकुरः।

[6] भास्कराचार्यः।

[7] सि.शि.पर्व-2।

● **ग्रहणस्य प्रकाराः –**

तच्च ग्रहणं द्विविधं सूर्यग्रहणं, चन्द्रग्रहणञ्च । ज्योतिषशास्त्रीयखगोलीयक्रिया–प्रतिक्रियासु व्याप्तकालस्य स्वीकृतिरेव ग्रहणमिति उच्यते । ग्रहणस्य पञ्चावयवाः मनीषिभिरुक्ताः स्पर्शः, सम्मीलनम्, मध्यग्रहणम्, उन्मीलनं मोक्षश्च ।

● **ग्रहणपरिचयः –**

**"सूर्यग्रहणं** ग्राहकचन्द्रेण सूर्यस्य ग्रहणम् इति सूर्यग्रहणम् । मध्यलग्नसमे भानौ हरिजस्य न सम्भवः । अक्षोदङ्–मध्यभक्रान्तिसाम्ये नावनतरेपि" ।[8] चन्द्रस्य ग्रहणम्, चन्द्रग्रहणम् अत्रग्राहको भूमेः छाया एवञ्च चन्द्रो ग्राह्यं भवति । यथोक्तं भास्करेण **"भानोर्बिम्बं** पृथुत्वात् पृथुपृथिव्याः प्रभा हि सूच्यग्रा । दीर्घतया शशिकक्षामतीत्य दूरं बहिर्याता" ।[9]

● **नक्षत्रशास्त्रदृष्ट्या आचार्याणां संस्कृतरूपकेषु ग्रहणविचारः**–

को न जानाति आचार्यराधावल्लभत्रिपाठिमहोदयस्य विषये ? प्रत्येकं क्षेत्रे सःधुरन्धरः विद्धान् अस्ति । तस्य आगाधं पाण्डित्यं प्रकृष्टं चिन्तनं चास्ति । साहित्य–नाट्यशास्त्रयोः अस्मदीयानां कुलपतिचराणां प्रो. राधावल्लभत्रिपाठिनां संस्कृतरूपकेषु ग्रहणविचारः क्रियते । आचार्यराधावल्लभत्रिपाठिप्रणीतं सुशीला प्रेक्षणकम् । अस्मिन् प्रेक्षणके समूहगीतस्य प्रसङ्गे ग्रहणविचारः दृश्यते **"कालचक्रमिह** परावर्तितम्, सर्वं विनाशितम्, सर्वमपहारितम्, प्राणधनं जीवने यदर्जितम्, गतं तदपि, नैव किमप्यवाप्तम् । आस्कन्नाऽहं निर्विण्णाऽहम्, इह तावत् सीदामि गर्ते पतितोद्धर्तुम् आत्मानं न प्रभवामि वृथा हिण्डितं, वृथा नर्तितम्" ।[10]

तत्र कालचक्रमिह परावर्तितं यस्मिन् समये ग्रहणकालः निर्धारितो भवति, तस्मिने काले शुभाशुभानि कार्याणि न क्रियन्ते, तत्रैव **कालचक्रिव गच्छति भाग्यपंक्तिः** इयम् उक्तिः आचार्यैः भणिता। यथा ज्योतिषशास्त्रे काल–विधानपूर्वकं वर्णनम् वर्तते। सूर्योदयः, सूर्यास्तं, चन्द्रोदयः–चन्द्रास्तं, अहोरात्र–संज्ञायां गण्यते। तथैव अत्रापि अस्मिन् रूपके समूहगाने कालचक्रपदारभ्य सम्पूर्णपदे कालद्योतकपूर्वकं घटनायाः दृश्यमानता दृश्यते, तथैव ज्योतिषशास्त्रे चन्द्रार्कौ प्रत्यक्षभूतौ दरीदृश्येते। यथा उक्तम् आचार्यैः **"अप्रत्यक्षाणि** शास्त्राणि विवादस्तेषु

---

[8] सूर्यसिद्धान्त।

[9] सि.शि.पर्व–2।

[10] सुशीलाप्रेक्षणकं श्लोक 3।

केवलम्। प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ" ।[11] अस्मिन् एव प्रसङ्गे ग्रहणकालविषये प्रोक्तं सूर्यसिद्धान्ते आचार्येण "भानोर्भार्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा। शशाङ्कपाते ग्रहणं कियद्भागाधिकोनके" ।[12] अग्रे अन्यरूपके प्रेक्षणसप्तके सोमप्रभम् इत्यस्मिन् संस्कृतरूपके नेपथ्यगायने नान्दिषु विद्यमानाः शब्दाः तस्यार्थं ज्योतिषदृष्ट्या विवृणोमि "**क्षितिजवक्षसि सूर्यदैवतं समुदितं, भुवनमखिलं किरणसन्ततिपिञ्जरितम् । अपसरति तमः स्तोमस्तथा चातिद्रुतम्, अरुणिमायं प्रसरति प्रतिदिक् सततं । मनो भास्करकरैरलं च विच्छुरितं जायते जनानां विमलसोमप्रभम् । जागृहि रे, जागृहि रे । प्रभाता निशा स्वपिषि कथं त्वं पिधाय नयनं काले किल भीतिकरे । उत्तिष्ठ, सत्त्वरमरे । सज्जी भव समरभरे सन्नह्यस्व द्वन्द्वे काले सङ्घर्षकरे" ।**[13]

अस्मिन् नान्दिषु प्रयुक्ताः शब्दाः ज्योतिषशास्त्रस्य पृथिव्याः आकाशादि सूर्योदयात् समये मनुष्याणां जागरणस्य हानिलाभः विषये जनयति। लाभस्तु प्रातकाले सूर्योदयात् पूर्वं जागरणम् सुखकरम् इति आचार्यैः भणितम् । तत्र तस्मिन् प्रसङ्गे सूर्योदयकाले जीवस्य नवचेतनायाः विकासः सम्भवति। परञ्च ये मानवाः सूर्योदयात् अनन्तरमपि शयनं कुर्वन्ति, तेषां शशीरे नानाव्याधयः समायान्ति । तथा च ये समयानुपालनं न कुर्वन्ति, तेषां का गतिः उक्तञ्च आचार्यैः **रात्रिर्गमिष्यति भविष्यति शुभप्रभातम् ।.................इति ।**[14]

अत्रापि ज्योतिषशास्त्रदृष्ट्या साहित्यशास्त्रेऽपि कालगतिविधानपूर्कं निश्चितावधेः ज्ञानं विचिन्त्य तत्र शुभाशुभं दृश्यानां कालरुकत्वं ग्रहणं क्रियते । महाकवेः विशाखदत्तस्य रूपके अपि मुद्राराक्षसे ग्रहणस्य वर्णनम् अस्ति । ग्रहाणां मानवजीवने प्रभावः यत् पिण्डे तद् ब्रह्माण्डे, इति सिद्धान्तेन न खलु दार्शनिकपक्षाणामेव सिद्धिर्भवति अपितु ज्योतिर्पिण्डानां ब्रह्माण्डान्तर्गतानां प्रभावानामपि सिद्धिर्भवति। केनापि सत्यमुक्तं यत् "**ग्रहैर्व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम्" ।** खस्थानां पिण्डानां भूस्थितजनैः सह सम्बन्धः सहसा न प्रतीतिमायाति परं तयोरविच्छिन्नः सम्बन्धोऽस्त्येव यथार्थतः शास्त्रप्रमाणात् । "**यः गतिमान् स ग्रहः"।** आकाशस्थसमस्तज्योतिर्पिण्डानां प्रभावः मानवोपरि स्वाभाविक एव ।

**निष्कर्षः** – भारतीयदर्शनं वेदादिशास्त्रैः ओतप्रोतं वर्त्तते । वेदादारभ्य प्रातिशाख्याः, शिक्षाग्रन्थाः, उपनिषत्, पुराणानि, एवं क्रमेण ज्योतिषादिशास्त्राणि पर्यन्तं अस्य चरमोत्कर्षं दृष्टुं शक्नुमः । अस्मिन्नेव क्रमे

---

11 ज्योतिषशास्त्रस्येतिहासः,लोकमणि दाहल।

12 सूर्यसिद्धान्ते चन्द्रग्रहणाधिकारे।

13 आचार्यराधावल्लभत्रिपाठि प्रेक्षणसप्तके, सोमप्रभम् रूपकं ।

14 अम्बिकादत्तव्यासः, शिवराजविजयः।

कालिदासभवभूत्यादिकविभिः स्वीयरचनासु ज्योतिषादिशास्त्राणां महत्तवं प्रतिपादितम् । एतेषां कृतिषु वयं ज्योतिषशास्त्रस्य प्रत्यक्षप्रभावं दृष्टुं शक्नुमः । अधुना न केवलं भारते अपितु आविश्वे भारतीयज्योतिषशास्त्रस्य महिमवर्णनं चलत् अस्ति । न केवलम् पुरातनैर्कविभिः अस्य महत्त्वं प्रतिपादितं वर्तते अपितु नूतनैरपि । नूतनेषु एषु आचार्यराधावल्लभत्रिपाठिमहोदयः अन्यतमः । महोदयस्य कतिपय रचनासु वयं नक्षत्रशास्त्रस्य प्रभावं दृष्टुं शक्नुमः। आसु स्वीयासु कृतिषु महोदयः भारतीयदर्शनस्य, विचाराणां च सम्यक् प्रतिपादनम् अकरोत्, यत् च अध्येतृभ्यो दिग्दर्शनं करोति भारतीयाः विशिष्टायाः परम्परायाः इति।

**सन्दर्भग्रन्थाः –**


1. सूर्यसिद्धान्तः, प्रो.रामचन्द्र पाण्डेय रंगनाथटीकाकृत तथा च आचार्यकपिलेश्वरशास्त्रिणा लिखित व्याख्या, चौ.सं. प्र.नवदेहली।

2. सू.सि.चन्द्रग्रहणाधिकारः

3.सिद्धान्त शिरोमणि पर्व–2 चौ.सुरभारती प्रकाशन वाराणसी।

4.प्रेक्षणसप्तकम् , आचार्यराधावल्लभत्रिपाठि, प्रतिभा प्रकाशन दिल्ली।

5.सुशीलाप्रेक्षणकम्, आचार्यराधावल्लभत्रिपाठि, संस्कृतपरिषद सागर विश्वविद्यालय सागर म.प्र.।

6.अथर्ववेद ,चौ.सं.प्र. नवदेहली।

7.वेदाङ्गज्योतिषम् लगधाचार्यः,चौ.प्र.नवदेहली।

8.भारतीयज्योतिषम्, शङ्करबालकृष्णः, चौ. सुरभारती प्रकाशन वाराणसी।